International Journal of Jyotish Research: 2023; 8(2): 235-238

International Journal of Jyotish Research
(वेदचक्षु)

ISSN: 2456-4427
Impact Factor: RJIF: 5.11
Jyotish 2023; 8(2): 235-238
© 2023 Jyotish
www.jyotishajournal.com
Received: 29-09-2023
Accepted: 25-10-2023

**डॉ० राघवेन्द्रमिश्रः**
ग्राम+पत्रालय- माऊँवेहट भाया– पुतई, जिला– दरभङ्गा, बिहार, भारत

Correspondence Author;
**डॉ० राघवेन्द्रमिश्रः**
ग्राम+पत्रालय- माऊँवेहट भाया– पुतई, जिला– दरभङ्गा, बिहार, भारत

# भूकम्पकारणं तत्फलञ्च

**डॉ० राघवेन्द्रमिश्रः**

**प्रस्तावना**

भूकम्पः अर्थात् भूमेः कम्पनं प्राकृतिकी आपदा कथ्यते। अत्र सर्वेषां प्राणिनाम् अपूरणीया क्षतिः भवति। एतत्कारणभूता बहवः विषयाः वर्णितास्सन्ति। ग्रहयोग–नक्षत्रयोग–वेलानुसारादिभिः भूकम्पः जायते। तदनुसारेण फलान्यपि मुनिभिः वर्णितानि सन्ति। तदिह यथामति प्रस्तूयते– भुवः=पृथिव्याः, कम्पः=आन्दोलनं भूकम्प इत्युच्यते, तत्र पौराणिकैः पण्डितैराधारपरम्पराधारणवद्भिः कच्छप–वासुकिदिग्गजान्यतमभूमिधारकशरीरपरिवर्तनेन भूकम्प उत्पद्यते। यथा हि–

क्षितिकम्पमाहुरेके बृहदन्तर्जलनिवासिसत्त्वकृतम्।
भूभारखिन्नदिग्गजविश्रामसमुद्भवं चान्ये॥ (१)

केषाञ्चन् मते समुद्रान्तर्गतबृहज्जलचरजीवसञ्चारोपद्रवेण पर्वतविदीर्णेन कस्यचिन्मतेऽनिलानलेन्द्रवरुणप्रकोपेण वा भूकम्पः भवति। तद्यथा काश्यपेन–

वरुणस्योपरि पृथ्वी सशैलवनकानना।
स्थिता जलजसत्वाश्च सक्षोभाश्चालयन्ति ताम्॥ (२)

कस्यचित् खगोलविज्ञानधनस्य जनस्य मते ग्रहसंयोगवियोगेन एवं पदार्थविज्ञानवतः कस्यचिन्मते भूगोलान्तर्गतगन्धकचुम्बक–लोह–धातुपदार्थानामाकस्मिकसंयोगजनितविषमयबाष्पनिःसरणात् सहसा भूविदारणम्, ततो महाञ्छब्दः, तदुभयतः कम्पश्च जायते। कस्यचिन्मते भूस्थचराचरजीवदुरदृष्टदोषेण भूकम्पो भवति। यथा गर्गेण–

चत्वारः पृथिवीं नागा धारयन्ति चतुर्दिशम्।
वर्धमानः सुवृद्धश्चातिवृद्धश्च पृथुश्रवाः॥
वर्धमानो दिशं पूर्वां सुवृद्धो दक्षिणां दिशम्।
पश्चिमामतिवृद्धश्च सौम्याशां तु पृथुश्रवाः॥
नियोगाद् ब्रह्मणो ह्येते धारयन्ति वसुन्धराम्।

ये श्वसन्ति यदा शान्ता स वायुः श्वसितो महान्॥
वेगान्महीं चालयन्ति भावाभावाय देहिनाम्। (३)

विष्णुपुराणे भूकम्पोत्पत्तिकारणद्वयं कथितम्। तद्यथा–

यदा विजम्भतेऽनन्तो मुदा घूर्णितलोचनः।
तदा चलति भूरेषा साद्रिद्वीपाब्धिकानना।(४)

अपि च बृहत्संहितायां पराशरादिमुनीनां मतम्(५)–

गिरिभिः पुरा सपक्षैर्वसुधा प्रपद्भिरुत्पतद्भिश्च।
आकम्पिता पितामहमाहामरसदसि सव्रीडम्॥
भगवन्नाम ममैतत्त्वया कृतं यदचलेति तन्न तथा।
क्रियतेऽचलैश्चलद्भिः शक्ताहं नास्य खेदस्य॥
तस्याः सगद्गदगिरं किञ्चित्स्फुरिताधरं विनतमीषत्।
साश्रुविलोचनमाननमालोक्य पितामहः प्राह॥
मन्युं हरेन्द्र धात्र्याः क्षिप कुलिशं शैलपक्षभङ्गाय।
शक्रः कृतमित्युक्त्वा मा भैरिति वसुमतीमाह॥
किन्त्वनिलदहनसुरपतिवरुणाः सदसत्फलावबोधार्थम्।
प्राग्द्वित्रिचतुर्भागेषु दिननिशोः कम्पयिष्यन्ति॥

भूकम्पस्य निदानमुक्तं कमलाकरदैवज्ञेन-

पाषाणैः कठिना भूमिर्यत्र तत्र कुतोबलात्॥
वाष्पनिःसरणात् कम्पः शब्दोऽपि सततं भुवि।
अत एवान्यभूमौ तु विनाऽऽयासात् कुतः किल॥
वाष्पनिःसरणे तत्र कदाचिद्रिष्टदोऽपि सः।
भूमिकम्पः पर्वतादौ सर्वदैवेति निर्णयः॥(६)

अर्थात् यस्मिन् प्रदेशे भूमिः पाषाणैः प्रस्तरैः कठिना कठोराऽस्ति तत्र कुतः=भूमध्यात्, बलात्= प्रयासबाहुल्यवेगात् वाष्पनिःसरणात्=भूगोलान्तर्गत-विषमपदार्थसंयोगजनितोष्मानिलनिर्गमनात्, भूमेः कम्पः=स्पन्दः, तथा शब्दः=मोटरचलननिनादवद्धनिश्च भुवि सततं भवति। अतएव अन्यभूमौ मृदुमृत्तिकात्मकप्रदेशे, आयासाद्विना, सहजेनैव कुतः=भूबिम्बान्तर्गतप्रदेशात्, वाष्पनिःसरणे कदाचिद्रिष्टदोऽपि भूकम्पो भवति। पर्वतादौ कठिनतरप्रदेशे सर्वदा बहुधा भूकम्पो भवति। यथोक्तं वाल्मीकिरामायणे–

तस्य शब्दो महानासीन्निर्घातसमनिःस्वनः।
भूमिकम्पश्च सुमहान् पर्वतस्यैव दीर्यतः॥(७)

तत्र दिनपूर्वार्धभागे वायुर्भूमिं कम्पयिष्यति दिनस्यापरार्धभागेऽग्निः। रात्रेः पूर्वार्धे इन्द्रः। रात्रेः परार्धे वरुणो भूमिं कम्पयिष्यतीति वेलामण्डलानि।

अतः वायुदहनेन्द्रवारुणमण्डललक्षणानि तत्फलानि च विविच्यन्ते।

तत्रादौ वायव्यकम्पलक्षणं तत्फलञ्च–

उत्तरफल्गुनी–हस्त–चित्रा–स्वाती–पुनर्वसु–मृगशिरा–अश्विनी–वायव्यमण्डलनक्षत्राणि सन्ति। अस्मिन् व्याप्तधूमनभः, वृक्षच्छेदनं, प्रचण्डः वायुः, रविकिरणमान्द्यञ्च भवन्ति। अस्मिन् शस्यजलवनौषधयः नश्यन्ति। वणिजां शोथ–स्वासरोगोन्माद–ज्वर–कफादिभिः पीड़ा भवति। वेश्या–शस्त्रजीवि–वैद्य–स्त्री–कवि–गायक–व्यापारि–शिल्पीनां सौराष्ट्र–कुरु–मगध–दशार्ण–मत्स्यदेशवासिनाञ्च पीडयति। अस्य फलं मासद्वयावधि, सप्ताहावधि षण्मासान्तः वा भवति।

ततः परम् आग्नेयमण्डलकम्पलक्षणं तत्फलञ्च–

पुष्य–कृतिका–विशाखा–भरणी–मघा–पूर्वभाद्रपद–पूर्वफल्गुनी–आग्नेयमण्डलनक्षत्राणि सन्ति। अस्मिन् दिग्दाहः, तारोल्कापातः, प्रज्वलित आकाशः भवति। तथा वायुना अग्निविचरणं क्रियते। आग्नेयभूकम्पे मेघ–वापी–कूप–तडागादिजलाशयानां नाशः, राजसु परस्परं द्वेषः, दाहः, विचर्चिका, ज्वरः, विसर्पिका पाण्डुरोगश्च भवन्ति। तेजस्विनां, क्रोधीनाम् अश्कम–अङ्ग–बाह्लीक–कलिङ्ग–वङ्ग–तङ्गण–द्रविण–शबरदेशवासीनां च विविधप्रकारैः पीड़ा भवति। अस्य फलं सार्धमासावधिः सप्ताहावधिः षण्मासान्तर्वा भवति।

ततः परमैन्द्रकम्पलक्षणतत्फलञ्च–

अभिजित्–श्रवण–धनिष्ठा–रोहिणी–ज्येष्ठा–उत्तराषाढ़–अनुराधा–नक्षत्राणि ऐन्द्रमण्डलनक्षत्राणि सन्ति। अस्मिन् पर्वताकारः, गम्भीरशब्दः, विद्युतयुक्तः, महिषशृङ्गसदृशः, भ्रमरकुल–सर्पसदृशकान्तिमाँश्च मेघः वर्षति। ऐन्द्रकम्पः प्रधानकुलोत्पन्नं यशस्विराजानं सङ्घिप्रधानञ्च नाशयति। तथा चातिसार–कण्ठरोग–मुखरोग–कफरोगाः भवन्ति। काशी–युगन्धर–पौरव–किरात–कीर–अभिसार–हल–मद्र–अर्बुद–सुराष्ट्र–मालवदेशवासीनां पीडयति। प्रयोजनानुसारं वृष्टिं करोति। अस्य फलं सप्ताहावधिः षण्मासान्तर्वा भवति।

ततः परं वारुणकम्पलक्षणतत्फलञ्च–

रेवती–पूर्वाषाढ़–आर्द्रा–आश्लेषा–मूल–उत्तरभाद्रपद–शतभिषानक्षत्राणि वारुणमण्डलनक्षत्राणि सन्ति। अस्मिन् वारुणकम्पे समुद्रतटवर्तीनां नदीतटवर्तीनाञ्च नाशः, अतिवृष्टिः परस्परं द्वेषरहितमानवानां तथा गोनर्द–चेदी–कुकुर–किरात–

वैदेहदेशवासीनां नाशः भवति। अस्य फलं षण्मासावधिः सप्ताहावधिर्वा भवति।

अत्रायं विशेष अस्ति यत् ऐन्द्रमण्डलोत्पन्नकम्पः वायव्यकम्पस्य, वायव्यमण्डलोत्पन्नकम्प ऐन्द्रकम्पस्य, वारुणमण्डलोत्पन्नकम्प आग्नेयकम्पस्य, आग्नेयकम्पोत्पन्नकम्पः वारुणकम्पस्य, वेलाजातकम्पः नक्षत्रकम्पस्य नक्षत्रजातकम्पः वेलाजातकम्पस्य च फलं नाशयति। वायव्यमण्डलान्तर्गत वायव्यवेलायां कम्पः यथार्थवायव्यमण्डलफलं ददाति। एवमेव आग्नेयैन्द्रवरुणमण्डलेष्वपि। यथोक्तं बृहत्संहितायाम्–

हन्त्यैन्द्रो वायव्यं वायुश्चाप्यैन्द्रमेवमन्योन्यम्।
वारुणहौतभुजावपि वेलानक्षत्रजाः कम्पाः ॥(८)

आग्नेयमण्डले वायव्यलेवायां वायव्यमण्डले आग्नेयवेलायां वा भूकम्पस्तदा विख्यातराज्ञो मरणं तत्तुल्यं कष्टं वा भवति। तथा दुर्भिक्ष–मृत्युरवृष्टिभिः पीड्यन्ते। एवमेव वराहेण–

प्रथितनरेश्वरमरणव्यसनान्याग्नेयवायुमण्डलयोः।
क्षुद्भयमरकावृष्टिभिरुपताप्यन्ते जनाश्चापि ॥(९)

वारुणमण्डले ऐन्द्रवेलायां ऐन्द्रमण्डले वारुणवेलायां वा भूकम्पः भवति चेत् जनेषु सुभिक्षः, कुशलता, वृष्टिः चित्तशान्तिश्च भवन्ति। तथा च गोदुग्धं वर्धते राजानश्च परस्परं द्वेषरहिता भवन्ति। एवमेव काश्यपेन(१०)–

ऐन्द्रश्चानिलजं हन्ति वायव्यश्चापि शक्रजम्।
आप्यो हौतभुजं हन्ति चाग्निर्वारुणसम्भवम् ॥
वाय्वग्निमिश्रितो यश्च वेलामण्डलसम्भवः।
दुर्भिक्षव्याधिरोगैस्तु पीड्यन्ते तत्र जन्तवः ॥
माहेन्द्रवारुणे यत्र वायुमण्डल सम्भवः।
सुभिक्षक्षेमधर्माणां तत्र वृष्टिः प्रतिष्ठिता ॥

वायव्यमण्डले भूकम्पे शतद्वययोजनम्, आग्नेयमण्डले दशयोजनं वारुणमण्डले अशीत्यधिकशतयोजनम् ऐन्द्रमण्डले च षष्ट्यधिकयोजनं यावत् भूमिः कम्पति। यथोक्तं वराहेण–

चलयति पवनः शतद्वयं शतमनलो दशयोजनान्वितम्।
सलिलपतिरशीतिसंयुतं कुलिशधरोऽभ्यधिकं च षष्टितः।(११)

एवमेव काश्यपेन–

वायव्ये मण्डले नित्यं योजनानां शतद्वयम्।
दशाधिकमथाग्नेय ऐन्द्रे षष्ट्यधिकं शतम् ॥
शतं चाशीतिसंयुक्तं वारुणे मण्डले चलेत् ॥(१२)

अथैकदा भूकम्पे तद्दिनात्परं पुनर्वक्ष्यमाणसमये भूकम्पः स्यात्तदा प्रधानभूपनाशो भवति। तदुक्तं वराहेण–

त्रिचतुर्थसप्तमदिने मासे पक्षे तथा त्रिपक्षे च।
यदि भवति भूमिकम्पः प्रधाननृपनाशनो भवति।(१३)

एवमेव काश्यपेन-
अर्द्धमासे चतुर्थेऽह्नि मासे सार्द्धे हि सप्तमे।
कम्पते धरणी चेत्स्यान्नृपतेः श्रेयसः क्षयः।(१४)

अथ ग्रहयोगवशेनापि भूकम्पः प्रजायते। यथा–
यदा षड्ग्रहयोगस्तदाऽपि भूकम्पसंभावना भवति, यत्र यस्मिन्नक्षत्रे योगस्तन्नक्षत्रं यन्मण्डलेऽस्ति, तदनुसारेण तद्देशे फलं भवति। षड्ग्रहयोगस्तु–
ग्रहाणामेकस्मिन् यदि भवति षण्णां निवसतिस्तदा गोलो योगः प्रलयपदमिन्द्रोऽपि लभते।
भवेल्लोको रङ्कस्त्यजति च जननी स्वसुतमपि प्रजानां नाशः स्याच्चलति वसुधा शुष्यति नदी ॥ (१५)
अपि च मकरन्दप्रकाशे–

वायुर्वाति महीरुहस्यपतनं भूकम्पसंक्षोभिता
पृथ्वीशैलमहातिश्रृङ्गपतनं लोकस्य नाशः सदा।
पीडा गोमहिषाश्वकुंजर प्रशोर्घोरा महीभीतिदा
शस्यानां च विनाशदारुणतरा सम्वाहके भूमिजे ॥ (१६)
सूर्ये लाघवतां व्रजन्ति जलदा मन्दान्नयुक्ता मही
रोगैः पित्तज्वरातिसारसहितैः शस्यै विनष्टाहठात्।
राजानो राष्ट्रवादाः पुरजनसहिताः यान्तियुद्धैकचित्ता
अर्कज्वालाभितप्ता चलति वसुमती पालके तीक्ष्णरश्मै।(१७)

अपि च प्रबन्धमणिमालायाम्-
महीसुतात् पञ्चमगो दिनेशः.............भूकम्पयोगं मुनयो वदन्ति।(१८)
अपि च मयूरचित्रके–

उपप्लवात् सप्तमगो महीजो महीसुतात् पञ्चमगो यदा बुधः।

बुधात् विद्धुः स्याच्च चतुष्टये स्थितः सचेः भूकम्पनयोग ईरितः ॥(१९)

आधुनिक विज्ञानानुसारेण पृथिव्याः स्थलमण्डले ( लिथोस्फीयरे) अकस्मात् ऊर्जास्त्रावेण समुत्पन्नस्य तरंगस्याघातेन भूकम्पो भवति। अनेन भूस्खलन-ज्वालामुखी विस्फोटोऽपि भवितुमर्हति। प्रायशः भूकम्पः अत्यधिकगैसप्रवासेन पृथिव्याभ्यन्तरात्यधिकमीथेन-ज्वालामुखि–भूस्खलन-नाभकीयपरीक्षणेत्यादिभिः भूगर्भोत्पन्नदोषैः भवति। यैः गृहपतनम्, अभियान्त्रिकी संरचना यथा- तटबन्धः, सेतुः, परमाणुशक्तिस्थानेत्यादिषु क्षतिः, सुनामी, भूकम्परोगः (धड़कनेत्यादि) समस्याः भवन्ति।

**सन्दर्भाः**


1. बृहत्संहिता– भूकम्पलक्षणाध्याय– श्लोक-१
2. तत्रैव
3. अद्भुतदर्पण-पृष्ठ- १४५
4. अद्भुतदर्पण-पृष्ठ- १४५
5. बृहत्संहिता– भूकम्पलक्षणाध्याय– श्लोक-३-७
6. सि.त.वि.– मध्यमाधिकार– श्लोक-२०६–२०८
7. वाल्मीकिरामायण- बालकाण्ड– सर्ग– ६७, श्लोक-१८
8. बृहत्संहिता– भूकम्पलक्षणाध्याय– श्लोक-२७
9. बृहत्संहिता– भूकम्पलक्षणाध्याय– श्लोक-२८
10. बृहत्संहिता– भूकम्पलक्षणाध्याय– पृष्ठ– २०५
11. बृहत्संहिता– भूकम्पलक्षणाध्याय– श्लोक-३१
12. तत्रैव
13. बृहत्संहिता– भूकम्पलक्षणाध्याय– श्लोक-३२
14. अद्भुतदर्पण– भूकम्पाद्भुतम्– पृष्ठ- १६१
15. दरभङ्गा– विश्वविद्यालयपञ्चाङ्ग– संवत्– २०७६, पृष्ठ– २१
16. मकरन्दप्रकाश– वर्षेशादिफलविवेकाध्याय– श्लोक-१०
17. तत्रैव, श्लोक– १५
18. प्रबन्धमणिमाला– पृष्ठ– ५९
19. मयूरचित्रक– अध्याय-२, श्लोक– ६२